# Shridhara Stutih

# શ્રીધરસ્તુતિઃ

## Document Information

Text title : Shridhara Stutih 2

File name : shrIdharastutiH2.itx

Category : deities_misc, gurudev, shrIdharasvAmI, stuti

Location : doc_deities_misc

Author : sachchidAnanda avadhUtasvAmI

Proofread by : Paresh Panditrao

Description/comments : shrIdharasvAmI stotrANi. shrIdharasandeshaH

Latest update : January 14, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2023

*sanskritdocuments.org*

Shridhara Stutih

# શ્રીધરસ્તુતિઃ

॥ શ્રીગુરવે નમઃ ॥

જગતઃ કારણં નિત્યં શ્રીધરં બ્રહ્મરૂપિણમ્ ।
આનન્દઘનરૂપં તં શ્રીધરં પ્રણતોઽસ્મ્યહમ્ ॥ ૧॥

નિત્યં વિચરતિ પદ્ભ્યાં તીર્થાનાં પાવનેચ્છયા ।
યોઽસૌ વિશ્વમ્ભરો દેવઃ શ્રીધરં પ્રણતોઽસ્મ્યહમ્ ॥ ૨॥

યદ્દૃષ્ટ્વા સુજના નિત્યં નૃત્યન્તિ સ્ફુટયન્તિ ચ ।
ભક્તાધીનં સદ્ગુરું તં શ્રીધરં પ્રણતોઽસ્મ્યહમ્ ॥ ૩॥

સર્વસ્વાર્થસુખં ત્યક્ત્વા લોકસ્ય હિતકામ્યયા ।
યઃ સદા તપોનિરતં શ્રીધરં પ્રણતોઽસ્મ્યહમ્ ॥ ૪॥

દુઃખમુક્તઃ સદાનન્દઃ સ્વાત્વનિષ્ઠો હિ કેવલઃ ।
મુમુક્ષુજનપીયૂષં શ્રીધરં પ્રણતોઽસ્મ્યહમ્ ॥ ૫॥

યઃ સ સર્વેષુ ભૂતેષુ સર્વવ્યાપી જગદ્ગુરુઃ ।
યથાકાશસ્થિતો વાયુઃ શ્રીધરં પ્રણતોઽસ્મ્યહમ્ ॥ ૬॥

યં નત્વા યતિભિઃ પ્રાપ્તો મોક્ષો હસ્તામલકવત્ ।
સત્યં જ્ઞાનમનન્તં તં શ્રીધરં પ્રણતોઽસ્મ્યહમ્ ॥ ૭॥

અનન્યાશ્ચિન્તયન્તો યં સજ્જનાઃ પર્યુપાસતે ।
સચ્ચિદાનન્દરૂપં તં શ્રીધરં પ્રણતોઽસ્મ્યહમ્ ॥ ૮॥

ગુરો ! ત્વદીય પદપઙ્કજપઞ્જરાન્તે
 અદ્યૈવ મે વિશતુ માનસરાજહંસઃ ।
પ્રાણપ્રયાણસમયે કફવાતપિત્તૈઃ
 કણ્ઠાવરોધનવિધૌ સ્મરણં કુતસ્તે ॥ ૯॥

એતત્સ્તોત્રં પઠેન્નિત્યં યઃ શ્રદ્ધાભક્તિસંયુતઃ ।

ગુરુનાથકૃપેણાસૌ રાજતે શરદિન્દુવત્ ॥ ૧૦॥

॥ શ્રીસદ્ગુરુદેવભગવાન્ વિજયતેતરામ્ ॥

ઇતિ શ્રી સચ્ચિદાનન્દ અવધૂતસ્વામીવિરચિતા શ્રીધરસ્તુતિઃ સમાપ્તા ।

Proofread by Paresh Panditrao

*Shridhara Stutih*

pdf was typeset on January 15, 2023

Please send corrections to *sanskrit@cheerful.com*